EDUTECH ACADEMY
NURTURING THE FUTURE...
Classes 5 to 10

# SET A

# N 677

Seat No. | | | | | | | |

**2026 I 01 1100 – N 677 - SANSKRIT (E) (SECOND OR THIRD LANGUAGE) (SK)**

## (REVISED COURSE)



**Time : 3 Hours** **(Pages 8 )** **Max. Marks : 80**

**सूचना :**

(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(2) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।
(3) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्

## प्रथमः विभागः - सुगमसंस्कृतम् ।(८)

**१. अ)चित्रं दृष्ट्वा नामानि लिखत | ( ५ तः ४ )** ४

१. 
२. 
३. 
४. 
५. 


**आ) सङ्ख्याः अक्षरैः / अकैः लिखत । ( ३ तः २ )** २

१. १७ २. ५१ ३. अष्टचत्वारिंशत्

**इ) समय-स्तम्भमेलनं कुरुत ।** २

| क्र. | अ | आ |
|---|---|---|
| १. | सपाद - सप्त - वादनम् | ९.५० |
| २. | दशाधिक - त्रिवादनम् | ७.१५ |
| ३. | दशोन - नव वादनम् | ८.०५ |
| ४. | पञ्चाधिक - अष्टवादनम् | ३.१० |

## द्वितीयः विभागः - गद्यम् । (२०)

**२. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** [०७]

अथ प्राप्तः सुदासस्तदुदानं यत्र भगवतः सुगतस्य निवासः। तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स महात्मा। अनल्पेन धाम्ना राजते स्म तस्य वदनम्। तदालोकयतः सुदासस्य चित्ते भाक्तिरसार्णवः उदतिष्ठत्। स हस्तस्थं नीरजं भगवतः सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत्। तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो भगवान् अभाषत, ''वत्स, किमिच्छसि?'' इति। एवम् उक्तवति सुगते निरिच्छः सुदासः प्रत्यवदत् "भगवन् किमन्यत्? केवलं भगवतः चरणकमलस्पर्शेन आत्मा मे कृतार्थतां लभताम्'' इति। एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीत् भगवान् सुगतः। अहो प्रभावः सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाणः सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान्। एषः सुगतः एव ननु भगवान् गौतमबुद्धः।

**१. अवबोधनम् । (४ तः ३)** **३**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. ________ वदनम् अनल्पेन धाम्ना राजते स्म। (भगवतः / श्रेष्ठिनः)

२. एषः सुगतः एव ननु भगवान् ________। (गौतमबुद्धः / शङ्करः)

**ख) कः कं वदति?**

"वत्स, किमिच्छसि?"

**ग) पूर्णवाक्येन उत्तरं लिखत।**

महात्मा कुत्र उपविष्टः आसीत्?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् । असत्यम् इति लिखत।**

सार्थवाहस्य चित्ते भक्तिरसार्णवः उदतिष्ठत्।

**२. शब्दज्ञानम् । ( ३ तः २)** **२**

**क) प्रश्ननिर्माणं कुरुत।**

सुदासः उद्यानं प्राप्तवान्।

**ख) मेलनं कुरुत।**

| | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|
| १. | धाम्ना | सुगतः |
| २. | भगवतः | अनल्पेन |
| | | सुगतस्य |

**ग) उत्तरपदं लिखत।**

१. इत्यब्रवीत् = इति + ______ ।

२. तद्विस्मृत्य = तत् + ______ ।

**३. पृथक्करणम्।** **२**

**क्रमेण योजयत ।**

१. सुदासस्य सुगत दर्शनम्।

२. सुदासस्य सुगतनिवासं प्रति आगमनम्।

३. सुगतस्य आशीर्वादप्रदानम्।

४. सुगतदर्शनात् बहुमूल्यस्य अपेक्षायाः विस्मरणम्।

**आ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **७**

| | |
|---|---|
| **समीरः -** | आम्। अहम् आय. आय. टी. अर्थात् भारतीय - प्रौद्योगिकी - संस्थानम् इत्यत्र सङ्गणक - अभियान्त्रिकी इति विषयस्य छात्रः। तत्र छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । अष्टाध्यायी इति व्याकरणशास्त्र विषयकः ग्रन्थः पाठ्यते तत्र मानव्यविद्याविभागे। अहं संस्कृतव्याकरणं सङ्गणकशास्त्रं च इति विषयम् अधिकृत्य संशोधनं करोमि । तद्विषयकं शोधनिबन्धं प्रस्तोतुम् अहं परिषदि निमन्त्रितः। |
| **महोदया -** | अहो आश्चर्यम्! तन्त्रज्ञानसंस्थायाम्? संस्कृतस्य अध्ययनम् ? |
| **महोदयः -** | महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः। |
| **समीरः -** | तिष्ठतु तावत्। तर्हि अवश्यं मेलयामि मे मित्राणि। एते सर्वेऽपि परिषदि सहभागिनः। |
| **प्रसादः –** | (अग्रे आगत्य) नमस्ते। अहं रसायनशास्त्रस्य छात्रः। प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम्। तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः। शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि। |
| **लीना -** | अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि। संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः। |
| तनुजा - | पार्श्वनिवेदनम् इति मे व्यवसायः। |

**१. अवबोधनम् । (४ तः ३)** **३**

**क. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. एते सर्वेऽपि सहभागिनः। (परिषदि / कार्यशालायाम्)

२. तद्विषयकाः ग्रन्थाः लिखिताः । (संस्कृतभाषया / मराठीभाषया)

**ख. पूर्णवाक्येन उत्तरं लिखत ।**

समीरः किम् अधिकृत्य संशोधनं करोति ?

**ग. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।**

मानव्यविद्याविभागे अष्टाध्यायी इति गणितशास्त्रविषयकः ग्रन्थः पाठ्यते।

**घ. एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?**

**२. शब्दज्ञानम्। (३ तः २)** **२**

**क. प्रश्ननिर्माणं कुरुत।**

प्रसादेन संस्कृतस्य अध्ययनं <u>शालायां</u> कृतम्।

**ख. उत्तरपदं लिखत।**

१. सर्वेऽपि = सर्वे + ______ ।

२. इत्यासीत् = इति + ______ ।

**ग. लकारं लिखत ।**

छात्राः संस्कृतमपि पठितुं **<u>शक्नुवन्ति</u>** ।

**३. पृथक्करणम्।**

**स्तम्भपूरणं कुरुत।**

| **विश्वसंस्कृत-परिषदि सहभागिनः जनाः** | |
|---|---|
| समीरः | ___________ |
| ___________ | रसायनशास्त्रच्छात्रः । |
| लीना | ___________ |
| ___________ | पार्श्वनिवेदिका। |

**इ. माध्यमभाषया सरलार्थं लिखत। (२ तः १)** **४**

१.

| | |
|---|---|
| **वसन्तसेना** – | रदनिके! स्वागतं ते । कस्य पुनरयं दारकः ? अनलङ्कृतशरीरोऽपिचन्द्रमुख आनन्दयति मम हृदयम् । |
| **रदनिका** - | एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम। |
| **वसन्तसेना** – | (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम्। अथ किं निमित्तमेष रोदिति ? |
| **रदनिका** - | एतेन प्रतिवेशिक - दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता। |

२.

| | |
|---|---|
| **विश्वामित्रः** - | नैव मातः, मास्तु देवेन्द्रस्य अवज्ञा। केवलम् इच्छामः परतीरं गन्तुम्। हे मातः, प्रसीद । वयं सर्वे तव पुत्राः एव। न वयं कदापि तव उपकारान् विस्मरामः। न किञ्चिदपि अस्माभिः कर्तव्यं येन तव अधिक्षेपः भवेत्। एषा मे प्रतिज्ञा। |
| **नदी (विपाट्)** - | किम् ? एषः मर्त्यः माम् माता इति सम्बोधयति ? |
| **नदी (शुतुद्री)** - | कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु, क्वचित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति? |

**ई) माध्यमभाषया उत्तरं लिखत। ( २ तः १)** **२**

१. शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा?

२. 'सः नरः शत्रुनन्दनः' इति वचनं कथायाः आधारेण स्पष्टीकुरुत।

<u>तृतीयः विभागः- पद्यम् । (१८)</u>

**प्र.३. अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

| |
|---|
| वैद्यराज नमस्तुभ्यं यमराजसहोदर। यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च।।१।। |
| यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि । निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।२।। |
| वृथाभ्रमणकुक्रीडापरपीडापभाषणैः । कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।३।। |

**१. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** २

**क. पूर्णवाक्येन उत्तरं लिखत।**

अल्पधीः कुत्र श्लाघ्यः भवति ?


**ख.पद्यांशात् विशेषणे चिनुत ।**

________ देशे ।

**ग. सन्धिविग्रहं लिखत।**

नमस्तुभ्यम् = ________ + ________ ।

**२. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** २




**आ. माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'मानवताधर्मः' इति काव्यस्य आधारेण मानवताधर्मस्य वर्णनं कुरुत।

२. कदा मदः व्यपगच्छति?

**इ. पद्ये शुध्दे पूर्णे च लिखत। (क , ख तः १ ग , घ तः १)** ६

१. क. रामाभिषेके ……………… ठठं ठः॥ अथवा

ख. रथस्यैकं चक्रं ……………. नोपकरणे॥

२. ग. यथा ……………. कर्मणा॥ अथवा

घ. घटं ……………. भवेत्॥

**ई. अन्वयं पूरयत ।** २

यदि (अपि) नीतिनिपुणाः —— स्तुवन्तु वा, लक्ष्मीः समाविशतु ——— गच्छतु वा, मरणम् अद्य एव अस्तु ——— वा, (तथापि) धीराः न्याय्यात् ——— पदं न प्रविचलन्ति।

**उ. सरलार्थं लिखत । (३ तः २)** ४

| |
|---|
| १. वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः।<br>तान् शिक्षयन्ति सततं ये सदा वाचने रताः।। |
| २. शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च।<br>उत्साहो वर्धते येन वाचनं तद् हितावहम्।। |
| ३. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः।<br>तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।। |

## चतुर्थः विभागः- लेखनकौशलम् । (९)

**प्र.४. अ. धातूनाम् अव्ययानां च उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (६ तः ४)** ४

क) दा - यच्छ् (१ प. प.) ख) रक्ष् (१ प. प.) ग) वि + तृ - तर् (१ प.प.)

घ) अलम् च) ऋते छ) उपरि

**अथवा**

**संस्कृतानुवादं कुरुत ।**

१. पर्वतावर मंदिर आहे. There is a temple on the mountain.

२. आम्ही दोघे कुत्र्याला शोधत आहोत. हम दोनों कुत्ते को ढूँढ़ रहे हैं। We both are searching for a dog.

३. ती जेवण शिजवते. She cooks the food.

४. राकेश डाव्या हाताने लिहितो. Rakesh writes with left hand.

५. विदयार्थी नदीच्या पाण्यात खेळले. Students played in the river's water.

६. ते दोघे मंगळवारी पुस्तके आणतील. They both will bring books on Tuesday.

**आ) ५ / ७ वाक्यात्मकं निबन्धं लिखत। ( ३ तः १ )** ५

१. मम प्रियः उत्सवः। २. मम प्रियः खगः। ३.मम प्रियः नेता।

**अथवा**

**साहाय्यक-शब्दानाम् आधारेण ५ / ७ वाक्यात्मकं चित्रवर्णनं कुरुत।**




( मञ्जूषा - तोलयति , क्रीणाति , विक्रीणीते , उपविशति , यच्छति , गृह्णाति , वहति , स्थापयति)

## पञ्चमः विभागः - भाषाभ्यासः। (१७)

**५. अ) तालिकापूर्तिं कुरुत।** ८

**१. नामतालिका। (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कपेः | ________ | ________ | षष्ठी |
| ________ | दिग्भ्याम् | ________ | चतुर्थी |
| वस्तु | ________ | ________ | व्दितीया |

**२. सर्वनामतालिका। (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ________ | ________ | एताभ्यः | चतुर्थी |
| त्वाम् / त्वा | ________ | ________ | व्दितीया |
| ________ | भवद्भ्याम् | ________ | पञ्चमी |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकारः | एकवचनम् | व्दिवचनम् | बहुवचननम् | पुरुषः |
|---|---|---|---|---|
| लोट् | स्मराणि | ________ | ________ | उत्तमः पुरुषः |
| लङ् | ________ | ________ | आस्त | मध्यमः पुरुषः |
| विधिलिङ् | ________ | मन्येयाताम् | ________ | प्रथमः पुरुषः |

**४. धातुसाधित-विशेषण-तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ / शानच् |
|---|---|---|---|---|
| कथ् (१०आ. प.) | _____ | कथितवान् | _____ | कथयमानः |
| नृत् (४प.प.) | नर्तितः | _____ | _____ | नृत्यन् |
| गम्-गच्छ् (१.प.प.) | _____ | गतवान् | गन्तव्यः | ________ |

**आ) निर्दिष्टाः कृतीः कुरुत। (४ तः ३ )** ९

**१. योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। ( ५ तः ३ )** ३

क. अस्माकं कुटुम्बं संवत्सरस्य _____ (१) पर्यटनार्थं गच्छति। (आवृत्तिवाचकम्)
ख. भोजने _____ (६) रसेषु मधुरः रसः मम प्रियः रसः। (सङ्ख्यावाचकम्)
ग. _____ (१) दिने क्षेत्रपतिना पाशः योजितः। (सङ्ख्यावाचकम्)
घ. भवने मम गृहं _____ (७) तले वर्तते। (क्रमवाचकम्)
च. माता _____ (५) मम युतकं प्रक्षालितवती। (आवृत्तिवाचकम्)

**२. समासानां तालिकापूर्तिं कुरुत। (५ तः ३)** ३

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| क. | शुकसारिकाः | ________ | इतरेतर द्वन्द्वः |
| ख. | ________ | चोर लुण्ठकेभ्यः भयम् | पञ्चमी तत्पुरुषः |
| ग. | ________ | किञ्चित् जानाति इति | उपपद तत्पुरुषः |
| घ. | अनावश्यकम् | ________ | नञ् तत्पुरुषः |
| च. | सूक्ष्मकणाः | सूक्ष्माः कणाः | ________ |

**३. समानार्थकशब्दान् | विरुद्धार्थकशब्दान् लिखत। (५ तः ३ )** ३

१. अधमः = २. राजा = ३. दक्षः =

४. प्राचीना x ५. पुरतः x

**४. सूचनानुसारं कृतीः कुरुत । ( ५ तः ३)** ३

क) महर्षिणा परमाणोः व्याख्या कृता। (वाच्यपरिवर्तनं कुरुत।)

ख) मृगः प्रत्यह तत्र गत्वा सस्यम् अखादत्। (त्वान्त-अव्ययं निष्कासयत।)

ग) त्वं धनुः त्यज। ('त्वं' स्थाने 'भवान्' योजयत।)

घ) अहम् अध्ययने यत्नं करोमि। (वाक्यं विधिलिङ्-लकारे परिवर्तयत।)

च) व्यास: गणेशेन महाभारतं लेखयति। (णिजन्तं निष्कासयत।)

## षष्ठः विभागः - अपठितम् । (८)

**अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** ४

पुष्पाणि अतीव मनोहराणि भवन्ति। अस्माकं राष्ट्रिय-पुष्पं कमलं तु अनुपमम् अस्ति। इदं जले जायते अतः अस्य अपराणि नामानि जलजम्, नीरजम्, अम्बुजम् इति। एतत् सर्वेषां मनांसि आह्लादयति सर्वेभ्यः च रोचते। कमलस्य सुगन्धः अपि मनोहरः। तस्मात् तस्य उपरि भ्रमराः गुञ्जन्ति। कमलस्य पत्रे स्थिताः जलबिन्दवाः मुक्तारत्नम् इव विभान्ति। तडागे विकसितानां कमलानां शोभा अतीव दर्शनीया वर्तते। कमलानां लता कमलिनी इति उच्यते। लक्ष्मीः कमले तिष्ठति अतः जनैः सा कमला, पद्मा इति उच्यते।

**१. पूर्णवाक्येन उत्तरं लिखत ।**

कमलस्य कानि अपराणि नामानि?

**२. प्रातिपदिकं लिखत ।**

क. जनैः ख. अस्य

**३. वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।**

तडागे विकसितानां कमलानां शोभा अतीव दर्शनीया वर्तते।

**४. माध्यमभाषया सरलार्थं लिखत ।**

तस्य उपरि भ्रमराः गुञ्जन्ति।

**५. गद्यांशात् लट् - लकारस्य क्रियापदं चिनुत लिखत च।**

**६. कारकपरिचयं कुरुत ।**

लक्ष्मीः <u>कमले</u> तिष्ठति।

**आ) १. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** ४

अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम्।
अहो सुमनसां प्रीतिः वामदक्षिणयोः समा॥

**क) पूर्णवाक्येन उत्तरं लिखत । ( २ तः १)** १

१. अञ्जलिस्थानि पुष्पाणि किं वासयन्ति?


२. केषां प्रीतिः वामदक्षिणयोः समा?

**ख) समानार्थक शब्दं लिखत।** १

पुष्पम् = ________ ।

**२. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।** २

अहिंसा परमः धर्मः तथा अहिंसा परः दमः।
अहिंसा परमं दानम् अहिंसा परमं तपः॥




**....All The Best....**

EDUTECH ACADEMY
NURTURING THE FUTURE....
— SCHOOL SECTION —

**CIDCO BRANCH**
9168 444 999
1ST FLOOR, INFRONT OF BALIRAM PATIL SCHOOL
**HARSUL-SAWANGI BRANCH**
9168 044 999
1ST FLOOR, INFRONT OF PANAD SUPER MARKET